# वर्णोत्पत्तिप्रक्रिया

डॉ. सुरेन्द्र कुमार शर्मा

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।
मन: कामाग्निमाहन्ति स प्रेरयति मारुतम्।।1।।

मारुतस्तूरसि चरन् मन्द्रं जनयते स्वरम्।
कण्ठे तु मध्यमं शीर्ष्णि तारं जनयति स्वरम्।।2।।

सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुत:।
वर्णान् जनयते तेषां विभाग: पधा भवेत्।।3।।

नाभौ प्राणस्य वायुत्वम् वायु: स्यादुरसि स्वर:।
स्वरो ध्वनिर्भवेत् शीर्ष्णि ध्वनिर्वर्णो मुखे भवेत्।।4।।

एत्वं मुखस्थिते स्थाने तत्र तत्र तु जन्मत:।
स्वराणां व्यञ्जनानां च स्थानभेदा भवन्ति हि।।5।।

अकारश्च हकारश्च जिह्वामूल्यं विसर्गक:।
कण्ठेनोच्चारणादेषां स्थानं कण्ठो हि जायते।।6।।

इकारश्च यकारश्च चवर्गस्तालवीयश:।
तालुनोच्चारणादेषां तालुस्थानं निगद्यते।।7।।

ऋकारश्च रकारश्च टवर्गो मूर्धजश्च ष:।
एतेषां मूर्धजन्यत्वात् मूर्धा स्थानं हि कथ्यते।।8।।

लृकारश्च लकारश्च तवर्गो दन्त्यसस्तथा।
दन्तदेशोद्भवादेषां स्थानं दन्ता: प्रकीर्तिता:।।9।।

उकारश्च पवर्गश्च तथोपध्मानभाक् च य:।
ओष्ठोद्भवत्वादेतेषां स्थानमोष्ठद्वयं मतम्।।10।।

ञमङणनवर्णानाम् अनुनासिकसंज्ञिनाम्।
तत्तत्स्थानातिरेकेण नासास्थानं विशिष्यते।।11।।

अनुस्वार: सदाऽस्माभिर्नासा द्वारा निगद्यते।
ततोऽनुस्वारवर्णस्य स्थानं नासा प्रकीर्त्यते।।12।।

एकारैकारयो: स्थानद्वयं कण्ठश्च तालु च।
ओकारौकारयोश्चापि कण्ठोष्ठं स्थानकद्वयम्।।13।।

यमानामानुनासिक्यात् स्थानं तेषां तु नासिका।
दु:स्पृष्टस्य लकारस्य स्थानं यत्र हि सोच्यते।।14।।

इत्थं विभिन्नस्थानत्वाद् वर्णा वै भिन्नजातय:।
परस्परं विजातीया: सजातीयाश्च ते मता:।।15।।

*प्राचार्यचरः,*
*श्री दादू आचार्य संस्कृत महाविद्यालय, जयपुर*